षष्ठः पाठः

# भारतीयसंस्काराः



**( भारतीयसंस्कृतेः अन्यतमं वैशिष्ट्यं विद्यते यत् जीवने इह समये समये संस्कारा अनुष्ठिता भवन्ति। अद्य संस्कारशब्दः सीमितो व्यङ्ग्यरूपः प्रयुज्यते किन्तु संस्कृतेरुपकरणमिदं भारतस्य व्यक्तित्वं रचयति। विदेशे निवसन्तो भारतीयाः संस्कारान् प्रति उन्मुखा जिज्ञासवश्च। पाठेऽस्मिन् तेषां संस्काराणां संक्षिप्तः परिचयो महत्वञ्च निरूपितम्। )**

भारतीयजीवने प्राचीनकालतः संस्काराः महत्त्वमधारयन्। प्राचीनसंस्कृतेरभिज्ञानं संस्कारेभ्यो जायते। अत्र ऋषीणां कल्पनासीत् यत् जीवनस्य सर्वेषु मुख्यावसरेषु वेदमन्त्राणां पाठः, वरिष्ठाणाम् आशीर्वादः, होमः, परिवारसदस्यानां सम्मेलनं च भवेत्। तत् सर्वं संस्काराणामनुष्ठाने संभवति। एवं संस्काराः महत्त्वं धारयन्ति। किञ्च संस्कारस्य मौलिकः अर्थः परिमार्जनरूपः गुणाधानरूपश्च न विस्मर्यते। अतः संस्काराः मानवस्य क्रमशः परिमार्जने दोषापनयने गुणाधाने च योगदानं कुर्वन्ति।

संस्काराः प्रायेण पञ्चविधाः सन्ति–जन्मपूर्वास्त्रयः, शैशवाः षट्, शैक्षणिकाः पञ्च, गृहस्थसंस्कारः विवाहरूपः एकः, मरणोत्तरसंस्कारश्चैकः। एवं षोडश संस्काराः भवन्ति। जन्मपूर्वसंस्कारेषु गर्भाधानं

पुंसवनं सीमन्तोनयनं चेति त्रयो भवन्ति। अत्र गर्भरक्षा, गर्भस्थस्य संस्कारारोपणम्, गर्भवत्याश्च प्रसन्नता चेति प्रयोजनं कल्पितमस्ति। शैशवसंस्कारेषु जातकर्म, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम्, चूडाकर्म, कर्णवेधश्चेति क्रमशो भवन्ति।

शिक्षासंस्कारेषु अक्षरारम्भ:, उपनयनम्, वेदारम्भ:, केशान्त: समावर्त्तनञ्चेति संस्कारा: प्रकल्पिता:। अक्षरारम्भे अक्षरलेखनम् अङ्कलेखनं च शिशु: प्रारभते। उपनयनसंस्कारस्य अर्थ: गुरुणा शिष्यस्य स्व गृहे नयनं भवति। तत्र शिष्य: शिक्षानियमान् पालयन् अध्ययनं करोति। ते नियमा: ब्रह्मचर्यव्रते समाविष्टा:। प्राचीनकाले शिष्य: ब्रह्मचारी इति कथ्यते स्म। गुरुगृहे एव शिष्य: वेदारम्भं करोति स्म। वेदानां महत्त्वं प्राचीनशिक्षायाम् उत्कृष्टं मन्यते स्म। केशान्तसंस्कारे गुरुगृहे एव शिष्यस्य प्रथमं क्षौरकर्म भवति स्म। अत्र गोदानं मुख्यं कर्म। अत: साहित्यग्रन्थेषु अस्य नामान्तरं गोदानसंस्कारोऽपि लभ्यते। समावर्त्तनसंस्कारस्योद्देश्यं शिष्यस्य गुरुगृहात् गृहस्थजीवने प्रवेश:। शिक्षावसाने गुरु: शिष्यान् उपदिश्य गृहं प्रेषयति। उपदेशेषु प्रायेण जीवनस्य धर्मा: प्रतिपाद्यन्ते। यथा- सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमद: इत्यादि।

विवाहसंस्कारपूर्वकमेव मनुष्य: वस्तुतो गृहस्थजीवनं प्रविशति। विवाह: पवित्रसंस्कार: मत: यत्र नानाविधानि कर्मकाण्डानि भवन्ति। तेषु वाग्दानम्, मण्डपनिर्माणम्, वधूगृहे वरपक्षस्य स्वागतम्, वरवध्वो: परस्परं निरीक्षणम्, कन्यादानम्, अग्निस्थापनम्, पाणिग्रहणम्, लाजाहोम:, सप्तपदी, सिन्दूरदानम् इत्यादि। सर्वत्र समानरूपेण विवाहसंस्कारस्य प्रायेण आयोजनं भवति। तदनन्तरं गर्भाधानादय: संस्कारा: पुनरावर्तन्ते जीवनचक्रं च भ्रमति। मरणादनन्तरम् अन्त्येष्टिसंस्कार: अनुष्ठीयते। एवं भारतीयजीवनदर्शनस्य महत्त्वपूर्णमुपादानं संस्कार: इति।

## पदच्छेदा:

| | | |
|---|---|---|
| महत्वमधारयन् | - | महत्त्वम् + अधारयन् |
| प्राचीनसंस्कृतेरभिज्ञानम् | - | प्राचीनसंस्कृते: + अभिज्ञानम् |
| कल्पनासीत् | - | कल्पना + आसीत् |
| मुख्यावसरेषु | - | मुख्य + अवसरेषु |
| संस्काराणामनुष्ठाने | - | संस्काराणाम् + अनुष्ठाने |
| गुणाधानरूपश्च | - | गुण + आधानरूप: + च |

| | | |
|---|---|---|
| दोषापनयने | – | दोष + अपनयने |
| जन्मपूर्वास्त्रय: | – | जन्मपूर्वा: + त्रय: |
| मरणोत्तरसंस्कारश्चैक | – | मरण + उत्तर + संस्कार: + च + एक: |
| सीमन्तोन्नयनम् | – | सीमन्त + उत् + नयनम् |
| संस्कारारोपणम् | – | सम् + कार + आरोपणम् |
| गर्भवत्याश्च | – | गर्भवत्या: + च |
| निष्क्रमणम् | – | नि: + क्रमणम् |
| कर्णवेधश्चेति | – | कर्णवेध: + च + इति |
| अक्षरारम्भ: | – | अक्षर + आरम्भ: |
| वेदारम्भ: | – | वेद + आरम्भ: |
| केशान्त: | – | केश + अन्त: |
| गोदानसंस्कारोऽपि | – | गोदानसंस्कार: + अपि |
| निरीक्षणम् | – | नि: + ईक्षणम् |
| तदनन्तरम् | – | तत् + अनन्तरम् |
| पुनरावर्त्तन्ते | – | पुन: + आवर्त्तन्ते |
| मरणादनन्तरम् | – | मरणात् + अनन्तरम् |
| अन्त्येष्टि | – | अन्त्य + इष्टि |

## पदार्था:

| | | | | |
|---|---|---|---|---|
| गुणाधानरूपा: संस्कारा: | – | परिष्कारा: | – | संस्कार, परिष्कार, गुणों का आधान |
| अभिज्ञानम् | – | परिचय: | – | पहचान |
| कल्पना | – | अभिधारणा | – | अवधारणा, सोच |
| दोषापनयने | – | दोषनिवारणे | – | दोषों को दूर करने में |
| गुणाधाने | – | गुणानाम् अङ्गीकारे | – | गुणों के ग्रहण में |

| | | |
|---|---|---|
| निष्क्रमणम् | - बहिर्गमनम् | - बाहर निकलना |
| अन्नप्राशनम् | - अन्नस्वीकरणम् | - अन्न का भोजन |
| उपनयनम् | - गुरोः सान्निध्यप्रापणम् | - गुरु के पास ले जाने वाला संस्कार (पुरा गुरुः शिष्यं स्वाश्रमं प्रति नयति स्म अतः संस्कारस्य नाम उपनयनम् अस्ति)। |
| क्षौरकर्म | - केशस्य कर्तनम् | - केशों को काटनेवाला कर्म |
| सप्तपदी | - विवाहसंस्कारे पत्या सह पत्न्याः सप्तवारं चक्रविशेषे पदनिधानम् | - विवाह संस्कार में पति के साथ पत्नी का सात बार अल्पना-विशेष में पैर देना। |
| लाजाहोमः | - धान्यस्य लाजया विधीयमानं हवनम् | - धान के लावे से किया जाने वाला हवन। |
| अन्त्येष्टिसंस्कारः | - मृतशरीरस्य अग्नौ ज्वालनम् | - शव को अग्नि में जलाना। (कुछ विशेष परिस्थितियों में शव को भूमि में गाड़ा भी जाता है) |
| उपादानम् | - स्रोतःस्वरूपम्, मुख्यकारणम् | - स्रोत स्वरूप |

## व्याकरणम्

| | |
|---|---|
| संस्कारः | - सम् + कृ + घञ् |
| संस्कृतेः | - सम् + कृ + क्तिन् ष.वि. ए.व. |
| अभिज्ञानम् | - अभि + ज्ञा + ल्युट् |
| सम्मेलनम् | - सम् + मिल् + ल्युट् |
| निष्क्रमणम् | - निस् + क्रम् + ल्युट् |
| उन्नयनम् | - उत् + नी + ल्युट् |
| आधानम् | - आङ् + धा + ल्युट् |

| | | |
|---|---|---|
| उपनयनम् | – | उप + नी + ल्युट् |
| आरोपणम् | – | आङ् + रुह् + णिच् + ल्युट् |
| निरीक्षणम् | – | निर् + ईक्ष् + ल्युट् |
| अध्ययनम् | – | अधि + इङ् + ल्युट् |
| लेखनम् | – | लिख् + ल्युट् |
| पालयन् | – | पाल् + णिच् + शतृ |
| प्रसन्नता | – | प्रसन्न + तल् + टाप् |
| महत्त्वम् | – | महत् + त्वम् |
| समाविष्टाः | – | सम् + आङ् + विश् + क्त |
| स्थापनम् | – | स्था + णिच् + ल्युट् |
| ग्रहणम् | – | ग्रह् + ल्युट् |
| दानम् | – | दा + ल्युट् |
| प्रवेशः | – | प्र + विश् + घञ् |
| निर्माणम् | – | निर् + मा + ल्युट् |
| आयोजनम् | – | आङ् + युज् + णिच् + ल्युट् |
| उपदिश्य | – | उप + दिश् + ल्यप् |
| उत्कृष्टम् | – | उत् + कृष् + क्त |
| संक्षिप्तः | – | सम् + क्षिप् + क्त |
| निवसन्तः | – | नि + वस् + शतृ प्र.वि. ब.व. |
| मौलिकः | – | मूल + ठक् |
| शैक्षणिकाः | – | शिक्षण + ठक् प्र.वि. ब.व. |
| पाठः | – | पठ् + घञ् |
| अनुष्ठाने | – | अनु + स्था + ल्युट् स.वि. ए.व. |

## अभ्यासः

### ( मौखिकः )

1. **एकपदेन वदत -**

(क) संस्काराः कति सन्ति ?

(ख) जन्मतः पूर्वं कति संस्काराः भवन्ति ?

(ग) शैशवे कति संस्काराः भवन्ति ?

(घ) अक्षरारम्भः कीदृशः संस्कारः ?

(ङ) गृहस्थजीवनस्य एकः संस्कारः कः ?

## अभ्यासः

### ( लिखितः )

1. **एकपदेन उत्तराणि लिखत -**

(क) भारतीयसंस्कृतेः परिचयः केभ्यः जायते ?

(ख) शैक्षणिकाः संस्काराः कति सन्ति ?

(ग) 'सप्तपदी' क्रिया कस्मिन् संस्कारे विधीयते ?

(घ) भारतीयदर्शनस्य महत्त्वपूर्णम् उपादानं किम् ?

(ङ) सीमन्तोन्नयनं केषु संस्कारेषु गण्यते ?

(च) अन्नप्राशनम् केषु संस्कारेषु गण्यते ?

(छ) गुरुगृहे शिष्यः कान् पालयन् अध्ययनं करोति ?

ABDIEL SOLUTIONS ABSOL PATNA

2. **पूर्णवाक्येन उत्तराणि लिखत -**

(क) संस्काराः मानवस्य कुत्र-कुत्र योगदानं कुर्वन्ति ?

(ख) शैक्षणिकसंस्कारेषु के के संस्काराः प्रकल्पिताः ?

(ग) शैशवसंस्कारेषु के के संस्काराः सम्पद्यन्ते ?

(घ) विवाहसंस्कारे कानि मुख्यानि कार्याणि भवन्ति ?

(ङ) अन्त्येष्टिसंस्कारः कदा सम्पाद्यते ?

(च) पुंसवनसंस्कारः कदा क्रियते ?

(छ) पुरा शिष्यः वेदारम्भं कुत्र करोति स्म ?

3. **अधोलिखितम् उदाहरणं ध्यानेन पठत । ततः प्रदत्तपदैः ............ कृत्वा ............ करोति / कुर्वन्ति प्रयोगपूर्वकं च एकैकं वाक्यं रचयत।**

उदाहरणम्- (क) बालकः स्नानं कृत्वा अध्ययनं करोति।

(ख) जनाः भोजनं कृत्वा शयनं कुर्वन्ति।

**प्रश्नाः -**

(क) अग्निस्थापनम्

(ख) अक्षरलेखनम्

(ग) पाणिग्रहणम्

(घ) निरीक्षणम्

(ङ) गोदानम्

(च) उपनयनम्

(छ) वाग्दानम्

4. **अधोलिखित-स्तम्भद्वये प्रदत्तपदानां समुचितविलोमपदैः सह मेलनं कृत्वा लिखत।**

| **स्तम्भः ( क )** | **स्तम्भः ( ख )** |
|---|---|
| (अ) प्रयोजनम् | (क) अप्रसन्नता |
| (आ) प्रसन्नता | (ख) निष्प्रयोजनम् |
| (इ) संस्काराः | (ग) आनयनम् |
| (ई) अपनयनम् | (घ) विस्मर्यते |
| (उ) स्मर्यते | (ङ) कुसंस्काराः |
| (ऊ) वरिष्ठानाम् | (च) गुणापनयनम् |
| (ऋ) गुणाधानम् | (छ) कनिष्ठानाम् |

5. निम्नाङ्कितप्रकृतिप्रत्ययानां योगं कृत्वा पदानि प्रदर्शयत।

(क) परि + मृज् + णिच् + ल्युट्

(ख) शिशु + अण्

(ग) प्र + अश् + ल्युट्

(घ) लिख् + ल्युट्

(ङ) क्रम + शतृ

## योग्यताविस्तारः

प्रस्तुतपाठः वर्तमानसन्दर्भे स्वकीयं भारतीयमूल्यं प्रति जागरणम् उत्पादयति। सम्प्रति यथा-यथा भौतिकविकासः जायमानः अस्ति तथा तथा आध्यात्मिकह्रासः परिलक्षितः भवति। अस्यां स्थितौ भारतीयसंस्काराः सार्वकालिकं जीवनमूल्यं संवर्द्धयितुं समर्थाः सन्ति। अतः संस्कृतशिक्षकस्य, अनुसन्धानेन सम्बद्धानां पत्र-पत्रिकाणां च सहयोगेन संस्काराणां वैज्ञानिकत्वं ज्ञातव्यम्। यतो हि अस्माकं संस्काराणाम् एकैकः पक्षः स्वास्थ्यविज्ञानस्य पारिस्थितिकतन्त्रस्य, समरससामाजिकजीवनदर्शनस्य च दृष्टिकोणैः सम्पुष्टः सूक्ष्मश्च अस्ति। अतः एतेषां निरादरः निन्दनीयः अस्ति। मौलाना एकवालः भारतीयसंस्कारान् एव उद्दिश्य सगर्वम् उक्तवान् आसीत् -

यूनान मिस्र रोमा सब मिट गये जहाँ से
कुछ बात है कि हस्ती मिटती नहीं हमारी।

ABDIEL SOLUTIONS ABSOL PATNA

### संस्कारवर्द्धककार्याणि -

1. प्रातः जागरणम् - प्रातः उत्थाय (सूर्योदयात् पूर्वमेव) करौ संयोज्य करतलं विलोकयन् संकल्पपूर्वकं पठेत् :-

करा‍ग्रे वसते लक्ष्मीः करमध्ये सरस्वती।
करमूले भवेद् गौरी, प्रभाते करदर्शनम्॥

इति पठित्वा करतलं परस्परं संस्पृश्य नेत्रे स्पृशेत्। ततः भूमिं स्पृष्ट्वा पठेत् -

समुद्रवसने देवि पर्वतस्तनमण्डिते।
विष्णुपत्नि ! नमस्तुभ्यं पादस्पर्शं क्षमस्व मे॥

ततः मातापितरौ परिवारस्य ज्येष्ठान् श्रेष्ठान् गुरुजनान् च प्रणमेत्। यतो हि अस्माकं

वैज्ञानिकी संस्कृतिः उपदेशं करोति-

मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव।

2. गायत्रीसन्ध्योपासनम् – इदं वेदप्रमाणितं तथ्यं वर्तते, यस्य आधुनिकवैज्ञानिका अपि समर्थनं कुर्वन्ति यत् गायत्रीजपेन सन्ध्योपासनया च आयुः, विद्या, यशः, कान्तिः, शान्ति, तेजः, अमरत्वं च प्राप्यन्ते। अतः स्वदैनिककार्यक्रमे गायत्रीजपस्य संध्योपासनस्य च कृते एकः निश्चितसमयः सुरक्षितः करणीयः। व्यक्तित्वसंवर्द्धनाय अयमेकः अमोघः (अचूक) उपायः अस्ति। प्राणायामसाधना अपि संध्योपासनस्यैव अंगभूता अस्ति। संस्कृतशिक्षकस्य योगशिक्षकस्य च सहयोगेन अभिभावकानां च परामर्शैः अस्मिन् सम्बन्धे कार्यं करणीयम्।

3. संस्काराणां महत्त्वप्रतिपादकानि बहूनि गीतानि लोकपरम्परायां प्रसिद्धानि सन्ति। तत्र उपनयनसंस्कारे केशकर्तनकाले गीयमानं संस्कारगीतम् -

नापित ! शनैः शनैः बटोः केशं मुण्डय-2

केशं मुण्डय रे नापित केशं मुण्डय। नापित ! शनैः ....

यदि त्वं बटोः केशं मुण्डयिष्यसि - 2

बटोः माता भूरि द्रव्यं दास्यति ॥ नापित।